# गीर्वाणवाणीविजयवैजयन्तीयात्रा




"गीर्वाणवाणीविजयवैजयन्तीयात्रा" इति नामिकायाः सुदीर्घयात्रायाः शुभारम्भः आस्ट्रेलियादेशादेव समभूत्। सुदीर्घयात्रेयं गच्छता कालेन विविधेषु खण्डेषु तदन्तर्गतदेशेषु च संस्कृतस्य कीर्तिपताकाम् उत्तोलयिष्यतीति विश्वासभूमिः। अधुना स्वामिनारायणशोधसंस्थानस्य सहयोगेन आस्ट्रेलियादेशे संस्कृतसङ्गोष्ठ्यः सर्वाः सुसम्पन्नाः। विशिष्य तदध्यक्षाः पूज्यभद्रेशदासवर्याः द्वितीयसङ्गोष्ठ्याः द्वितीयदिवसे केन्द्रीयसंस्कृतविश्वविद्यालयस्य कार्यं तत्सूत्रधारस्य सामर्थ्यम् अर्हतां च दर्शं दर्शम् अन्ताराष्ट्रियस्तरे संस्कृतराजदूतः इत्युपाधिं प्रायच्छन्। अयमुपाधिः विविधसङ्घटनप्रतिनिधीनां संस्कृतानुरागिणां छात्राणां च समक्षं लब्धः। राजदूतोपाधिः अन्ताराष्ट्रियस्तरे विश्वविद्यालयस्यास्य कीर्तिं प्रीतिं च संवर्धयिष्यतीति निश्चप्रचम्।

सन्दर्भेऽस्मिन् उपाधिं स्वीकृत्य कुलपतयः अवोचन् यत् "गीर्वाणवाणीविजयवैजयन्तीयात्रा इतः आरब्धा। भाविनि काले शास्त्रार्थसङ्गोष्ठीमत्रापि आयोजयिष्यामः। अस्माकं शास्त्रमधीयानाः छात्राः विदेशेषु अपि उद्योगावसरं प्राप्स्यन्ति। आस्ट्रेलियादेशस्य प्रह्लादगुरुकुलस्य महन्तसंस्कृतपाठशालायाः च छात्रान् दृष्ट्वा पुलकितोऽस्मि। अग्रे एतान् अन्यदेशीयान् अपि संस्कृतच्छात्रान् संयोज्य अन्ताराष्ट्रियस्पर्धाकार्यक्रमान् अपि आयोजयिष्यामः। आस्ट्रेलिया-देशे अधीयानाः तत्रत्यशिक्षया सह मुक्तस्वाध्यायपीठेन उपाधिम् अर्जयितुम् आवर्षं मुक्तम् अवसरं कल्पयिष्यामः"।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य आचार्याः अधुना श्री सोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतित्वेन कार्यरताः आचार्याः सुकान्तकुमारसेनापतिवर्याः आचार्यः गणेश ति. पण्डितवर्यः डा. पवनव्यासवर्यश्च अस्मिन् सन्दर्भे सहयोगं प्रायच्छन्। एषः गौरवोपाधिः न केवलं विश्वविद्यालयस्य अपि तु समेषां संस्कृतानुरागिणां मोदाय अकल्पत।

- आचार्यः गणेश ति. पण्डितः



स्वामिनारायण
BAPS

# Sanskrit Ambassador Award

It is with great honor that BAPS Swaminarayan Research Institute, Australia, presents the **Sanskrit Ambassador Award to Central Sanskrit University Delhi**, in recognition of their tireless efforts to promote and preserve the ancient language of Sanskrit.

As **Vice Chancellor, Professor Shrinivasa Varakhedi** you have excelled the institution to become a beacon of excellence in Sanskrit education, fostering a deeper understanding and appreciation of India's rich cultural heritage. Through your dedication and commitment, you have inspired countless individuals to embrace the beauty and wisdom of Sanskrit, ensuring its continued relevance and significance in modern times. In this regard, we offer this award to you.

Mahamahopadhyaya Bhadreshdas Swami
Head of BAPS Swaminarayan Research Institute

15th September 2024

BAPS SWAMINARAYAN RESEARCH AUSTRALIA

॥ जीयात् गीर्वाणभारती ॥